अकर्तव्यं भगवतः सर्वथा चेद्गतिर्न हि ।
यथा वा तत्त्वनिर्धारो विवेकः साधनं मतम् ॥३॥
बाधकानां परित्यागो भोगेऽप्येकं तथा परम् ।
निष्प्रत्यूहं महान् भोगः प्रथमे विशते सदा ॥४॥
सविघ्नोऽल्पो घातकः स्याद्बलादेतौ सदा मतौ ।
द्वितीये सर्वथा चिंता त्याज्या संसारनिश्चयात् ॥५॥
नन्[1]वाद्ये दातृता नास्ति तृतीये बाधकं गृहम् ।
अवश्येयं सदा भाव्या सर्वमन्यन्मनोभ्रमः ॥६॥
तदीयैरपि तत्कार्यपुष्टौ नैव विलंबयेत् ।
गुणक्षो[2]भोऽपि द्रष्टव्यमेतदेवेति मे मतिः ॥ ७ ॥
कुसृष्टिरत्र वा काचिदुत्पद्येत स वै भ्रमः ॥ ८ ॥

इति श्रीवल्लभाचार्यविरचितं सेवाफलं समाप्तम् ।

# अथ सेवाफलविवरणम् ।

श्रीकृष्णाय नमः ।

सेवायाः फलत्रयम्—अलौकिकसामर्थ्यं सायुज्यं सेवौपयिकदेहो वा वैकुंठादिषु । सेवायाः प्रतिबंधकत्रयम्—उद्वेगः प्रतिबंधो भोगो वा ॥ त्रयाणां साधनपरित्यागः कर्तव्यः ॥ भोगो द्विविधः—लौकिकोऽ-

१ न त्वाद्ये इति पा०. २ क्षोभेऽपि.

लौकिकश्च ॥ तत्र लौकिकस्त्याज्य एव ॥ प्रतिबंधोऽपि द्विविधः-साधारणो भगवत्कृतश्च । तत्राद्यो बुद्ध्या त्याज्यः ॥ अलौकिकभोगस्तु फलानां मध्ये प्रथमे प्रविशति ॥ भगवत्कृतश्चेत्प्रतिबंधस्तदा भगवान् फलं न दास्यतीति मंतव्यम् ॥ तदान्यसेवापि व्यर्था, तदा आसुरोऽयं जीव इति निर्धारः, तदा ज्ञानमार्गेण स्थातव्यं शोकाभावायेति विवेकः ॥ ननु साधारणो भोगः कथं त्यक्तव्य इत्याकांक्षायामाह सविघ्नोऽल्पो घातकः स्यादिति ॥ सविघ्नत्वादल्पत्वाद्भोगस्त्याज्यः ॥ एतौ सदा प्रतिबंधकौ ॥ द्वितीयो भगवत्कृतप्रतिबंधः ज्ञानस्थित्यभावे चिंताभावार्थमाह-द्वितीय इति ॥ आद्यफलाभावे भगवतो दातृत्वं नास्ति तदा सेवा नाधिदैविकीत्युक्तं भवति ॥ भोगाभावस्तदैव सिद्ध्यति यदा गृहपरित्यागः ॥

इति श्रीवल्लभाचार्यविरचितं सेवाफलविवरणं समाप्तम् ।

## अथ परिवृढाष्टकम् ।

श्रीकृष्णाय नमः ।

कलिंदोद्भूतायास्तटमनुचरंतीं पशुपजां
रहस्येकां दृष्ट्वा नवसुभगवक्षोजयुगलाम् ॥